दिनाङ्क :- 19.02.2026

प्रात: - 06:55

अथ वार्ताः

प्रधानमन्त्री ए.आई. शिखर सम्मेलनस्य

प्रधानमन्त्री नरेन्द्र मोदी अद्य इण्डिया ए.आई. इम्पैक्ट इत्येतस्य शिखर सम्मेलनस्य उद्घाटनं विदध्यात्। श्री मोदी अद्य शिखर- सम्मेलनस्य एतस्य उद्घाटन- समारोहे भागग्रहणं कुर्यात्। उद्घाटन-समारोहे फ्रांस देशस्य राष्ट्रपतिः इमैनुअल मैक्रो इत्यसौ, संयुक्त राष्ट्रस्य महासचिवः, विश्वे विभन्नशीर्षोद्योग - जगतः नेतारश्च स्वीय सम्बोधनं प्रददुः। एतत्पूर्वं गतदिने सायंकाले प्रधानमन्त्री नरेन्द्र मोदी भारत- मण्डपम इत्यत्र वैश्विक- नेतृणां स्वागतं कृतवान्। शिखर सम्मेलने फ्रांसदेशस्य राष्ट्रपतिः इमैनुएल मैक्रों, ब्राजीलदेशस्य राष्ट्रपतिः लूइज इनासियो लूला दा सिल्वा इत्यसौ, स्पेनदेशस्य प्रधानमन्त्री पेड्रो सांचेज, अथ फिनलैण्ड- भूटान- मॉरीशस- इत्येतेषां राष्ट्राणां प्रधानमन्त्रिणः नैके गणमान्याश्च समुपस्थिताः सन्ति। श्री मोदी वैश्विक नेतृभ्यः रात्रिभोजस्य आयोजनमपि कृतवान। सम्मेलन - विषये केन्द्रीयः मन्त्री धर्मेन्द्र- प्रधानः प्रोक्तवान् यत् एतेन सम्मेलनेन सम्पूर्णे अपि विश्वे एआई-कृते भारतं महत्वपूर्ण मञ्चं सिध्येत्।

भारत - निर्वाचनायोग

भारत- निर्वाचनायोगेन पश्चिम- बंगाले प्रवर्तमानायां विशेष-गहन- पुनरीक्षण- प्रक्रियान्तर्गतं वृहत्- संख्यानां मतदातृणां प्रपत्राणि तन्त्रपटलमध्ये प्रपूरणतायाः विफलतमालक्ष्य सम्बद्धेभ्यः पंजीकरण- अधिकारिभ्यः कारणप्रदानसम्बद्धानि

प्रतिपत्राणि निस्सारितानि। अवधेयं यत् प्राप्त- सूचनाधारेण साम्प्रतं यावत् लक्षाधिकानि पत्राणि तन्त्रपटल- मध्ये न प्रपूरितानि सन्ति।

## छत्तीसगढ़ जनगणना

छत्तीसगढ़ प्रदेशे आगामि- जनगणनान्तर्गतं गृह- सूचीकारणस्य अथ आवास- जनगणनायाः प्रथमं चरणं मे-मासस्य प्रथमदिनाङ्कात् अन्तिमं दिनांकं यावत् समायोजयिष्यते। प्रक्रियायामस्यां राजयस्य त्रयस्त्रिंशत् जनपदानि अथ विंशति - सहस्र- ग्रामाश्च सम्मिलिता। एतदर्थं मण्डल- स्तरीय- अधिकारिभ्यः प्रशिक्षण- सम्मेलनं समायोजितम्। सम्मेलनं सम्बोधयन् मुख्यमन्त्री विष्णु - देव- साई प्रोक्तवान् यत् जनगणना न केवलं गणना, अपि राष्ट्रनिर्माणस्य आधारशिला अपि वर्तते।

## प्रधानमन्त्री रमजान

प्रधानमन्त्री नरेन्द्र मोदी मुस्लिमधर्मिणां पवित्र- रमजान- पर्व आलक्ष्य समेभ्यः शुभकामनाः दत्तवान्। संचार-तन्त्रपटले श्री मोदी प्रकशितवान् यत् रमजान मुबारक अथ श्री मोदी आशां प्रकटितान् यत् एषः शुभमासः समाजे ऐक्य भावनां सुदृढीकरिष्यति, अथ सर्वत्र शांतिः समृद्धिश्च प्रसरेत्।

महिला क्रिकेट

महिलानां क्रिकेट्- स्पर्धायां भारत- ऑस्ट्रेलिया - दलयोः मध्ये त्रिस्पर्धात्मिकायाः विंशतिः प्रतिविंशतिः - सपर्धामालिकायाः द्वितीय स्पर्धा अद्य कैन्बरा- क्रीडांगणे समायोजयेत्। एषा स्पर्धा भारतीय - समयानुसारं पादोन- द्विवादने प्रारभेत्।

आईसीसी

आईसीसी- विंशतिः प्रतिविंशतिः विश्व- चषक- प्रतिस्पर्धायां गतरात्रौ अहमदाबादस्य नरेन्द्रमोदी- क्रीडांगणे क्रीडिते द्वन्द्व भारतेन नीदरलैण्डस् दलं सप्तदश- धावनांकैः पराजितम्।